**दिनाङ्क :- 17.05.2026**
**प्रात: - 06:55**

**संस्कृत वार्ता:**

**अथ वार्ताः**

**प्रधानमन्त्री/नीदरलैण्ड्सम्**

पञ्चदेशानां यात्रायाः द्वितीये दिने ह्यः प्रधानमन्त्री नरेन्द्रमोदी नीदरलैण्ड्स-देशस्य प्रधानमन्त्रिणा सह अनेकेषु कार्यक्रमेषु सहभागम् अकरोत्। अत्र सामुदायिक-सम्पर्कः डच्-राजपरिवारेण सह मेलनं च अन्यतमे आस्ताम्। हेग-नगरे भारतीय-समुदायं सम्बोधयन् श्रीमोदी प्रवर्तमानं दशकम् आपद्-दशकत्वेन वर्णितवान्, यद् हि बहुविधैः सङ्कटैः ग्रस्तमस्ति। प्रधानमन्त्री अवदत् यत् भारत-नीदरलैण्ड्स-देशौ वैश्विक-समाह्वानानि सम्मुखीकर्तुं विश्वस्तायाः पारदर्शिन्याः च भविष्यापूर्ति-व्यवस्थायाः निर्माणार्थं सम्भूय कार्यरतौ स्तः। सः अवदत् यत् विश्वं सर्वादौ कोविड्-नवदश-महामारीं तदनन्तरं च युद्धं सम्मुखीकृतवत्। साम्प्रतम् एतत् ऊर्जासङ्कट-समं विकट-समाह्वानं सम्मुखीकरोति।

सः सावहितम् अकरोत् यत् एतेषां समाह्वानानां द्रुतगत्या यदि निराकरणं न भवति चेत् वैश्विकविकासलाभः प्रबाधितः भविष्यति, जनसङ्ख्यायाः विशालः भागः च निर्धनता-ग्रस्तः भविष्यति। आर्थिक-स्थिति-व्यवस्थायाः सुदृढीकरणाय वैश्विकान् प्रयासान् प्रकाशयन् प्रधानमन्त्री अवदत् यत् भारत-नीदरलैण्ड्स-देशौ संयुक्तरूपेण सुदृढापूर्ति-शृङ्खलायाः निर्माणाय कटिबद्धौ स्तः।

**प्रधानमन्त्री/स्वीडनयात्रा**

नीदरलैण्ड्स-देशस्य यात्रायाः अनन्तरं प्रधानमन्त्री अद्य स्व-यात्रायाः तृतीय-चरणे स्वीडन-देशस्य यात्रां करिष्यति। सः अद्य गोथेनबर्ग-नगरं सम्प्राप्नोति।
स्वीडन-देशस्य एकदिवसीया यात्रा नवदिल्ली-स्टॉकहोमयोः वर्धमान-पारस्परिक-सम्बन्धेषु ऐतिहासिकः पदक्रमः अस्ति। श्रीमोदी स्वीडन-समकक्षेण उल्फ-क्रिस्टर्सनेन सह द्विपक्षीय-सम्बन्ध-परकं सम्भाषणं करिष्यति।

**केन्द्रीयमाध्यमिकशिक्षापरिषद्/त्रिभाषासूत्रम्**

सी.बी.एस्.ई. इत्यनेन केन्द्रीय-माध्यमिक-शिक्षा-परिषदा नवम-कक्षायाः छात्रेभ्यः भाषा-त्रयस्य अध्ययनं जुलाई-मासस्य प्रथम-दिवसात् अनिवार्यं कृतम्। परिषदा विज्ञप्तौ उक्तं यत् विंशत्यधिक-द्विसहस्र-तमाब्दीयायाः राष्ट्रिय-शिक्षा-नीतेः त्रयोविंशत्यधिक-द्विसहस्र-तमाब्दीयस्य राष्ट्रिय-विद्यालय-शिक्षा-पाठ्यक्रमस्य अनुसारि एतासु तिसृषु भाषासु न्यूनातिन्यूनं भाषाद्वयं भारतीय-मूलकं भवेत्।

**ऋतुः**

भारतीयर्तु-विभागेन अद्य अण्डमान-निकोबार-द्वीप-समूहाय, पश्चिम-बंगाले हिमालयस्य अधोवर्ति-क्षेत्रेभ्यः, सिक्किमाय च अतिवृष्टि-परा नारङ्ग-वार्णिकी संचेतना प्रसारिता अस्ति। केरलम्-माहे-लक्षद्वीप-दक्षिणाभ्यन्तरीण-कर्नाटक-तमिलनाडु-पुद्दुचेरी-कराईक्कलेषु उत्तर-पूर्वीय-क्षेत्रस्य कतिपय-भागेषु च समाना एव स्थितिः भविष्यति इत्यपि विभागेन सूचितम्।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

**बैडमिण्टन्**

बैंकॉक-नगरे, थाईलैण्ड-ओपन्-बैडमिण्टन्-क्रीडा-मालिकाया: पुरुष-युगल-वर्गीये निर्णायक-द्वन्द्वे, अद्य भारतस्य सात्विक-साईराज-रंकी-रेड्डी चिराग-शेट्टी च इंडोनेशिया-देशस्य लियो-रॉली-कार्नांडो-डेनियल-मार्थिनाभ्यां स्पर्धिष्येते।

**क्रिकेट्**

इण्डियन्-प्रीमियर्-लीग्-क्रिकेट्-स्पर्धा-मालिकायां गतरात्रौ कोलकाताया: ईडन्-गार्डन्स्-क्रीडाङ्गणे आयोजिते द्वन्द्वे कोलकाता-नाइट्-राइडर्स्-दलेन गुजरात-टाइटन्स्-दलम् ऊनत्रिंशत्-धावनाङ्कै: पराजितम्। आदौ पणं विजित्य गुजरात-टाइटन्स्-दलं क्षेत्ररक्षणं कर्तुं निर्णीतवत्। तत: कोलकाता-नाइट्-राइडर्स्-दलेन स्थापितं अष्टचत्वारिंशदधिक-द्विशत-धावनाङ्कानां विजय-लक्ष्यम् अनुसरत् गुजरात-टाइटन्स्-दलं चतुर्णां क्रीडकानां हानि-पुरस्सरम् अष्टादशोत्तर-द्विशत-धावनाङ्कान् एव अर्जितुम् अपारयत्।

अद्यतने द्वन्द्वद्वये, प्रथमं धर्मशालायाम् अपराह्ने सार्ध-त्रिवादने पञ्जाब-किंग्स्-दलं रॉयल-चैलेंजर्स-बेंगलुरु-दलेन स्पर्धिष्यते। तत: सायं सार्ध-सप्त-वादने दिल्ल्यां दिल्ली-कैपिटल्स्-दलं राजस्थान-रॉयल्स्-दलं सम्मुखीकरिष्यति।

**॥ इति वार्ता:॥**